# Shri Sharika Stotram

# श्रीशारिकास्तोत्रम्

## Document Information

Text title : shArikAstotram

File name : shArikAstotram.itx

Category : devii, shArikA, devI

Location : doc_devii

Transliterated by : Nat Natarajan

Proofread by : Nat Natarajan, NA

Latest update : June 17, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 2, 2024

*sanskritdocuments.org*

Shri Sharika Stotram

# श्रीशारिकास्तोत्रम्

श्रीशारिके शरण्ये त्वं मयि दासे कृपां कुरु ।
ऋणं रोगं भयं शोकं रिपुन्नाशय सत्वरम् ॥

प्रध्युम्नशिखरासीनां मातृचक्रोपशोभिताम् ।
पीठेश्वरीं शिलारूपां शारिकां प्रणमाम्यहम् ॥

उमा चैवतु कामा च चार्वङ्गी टङ्कधारिणी ।
तारा च पार्वती पायाद्यक्षिणी शारिकाष्टमी ॥

शान्तिं नयस्याशु जनस्य पापं रिक्तत्वमर्थैन निराकरोषि ।
कायं निषिञ्चस्यपि भाग्यपूरैः प्रगीयसेऽतः खलु शारिकात्वम् ।
अमे सुरेशि योगीन्द्रामृतपायनतत्परे ।
श्रीशारिके नमस्तेऽस्तु पाहि मां शरणागतम् ॥ १॥

कामे कामितकामानां पूरणे पूर्णताप्रदे ।
श्रीशारिके नमस्तेऽस्तु पाहि मां शरणागतम् ॥ २॥

चार्वङ्गि कोटिकन्दर्पलावण्ये विश्वमोहिनि ।
श्रीशारिके नमस्तेऽस्तु पाहि मां शरणागतम् ॥ ३॥

टङ्कवारिणि शत्रूणां तिलशो देहखण्डिनि ।
श्रीशारिके नमस्तेऽस्तु पाहि मां शरणागतम् ॥ ४॥

तारे निसर्गगम्भीरभवसागरतारिणि ।
श्रीशारिके नमस्तेऽस्तु पाहि मां शरणागतम् ॥ ५॥

पार्वति त्रिजगन्मातर्हिमवद्वंशपावने ।
श्रीशारिके नमस्तेऽस्तु पाहि मां शरणागतम् ॥ ६॥

यक्षिणीष्टाष्टसिद्धीनां दायिनि देवपूजिते ।
श्रीशारिके नमस्तेऽस्तु पाहि मां शरणागतम् ॥ ७॥

सत्त्वादिशबलेऽनन्तब्रह्माण्डजननीश्वरि ।
श्रीशारिके नमस्तेऽस्तु पाहि मां शरणागतम् ॥ ८॥

कलानिधिकलाकान्तकिरीटकुण्डलोज्ज्वले ।
श्रीशारिके नमस्तेऽस्तु पाहि मां शरणागतम् ॥ ९॥

श्रीशारिका जगन्माताऽनाथनाथा सुरेश्वरी ।
प्रियतां पादयोरेतत्स्तोत्रपुष्पसमर्पणात् ॥ १०॥

इति शारिकास्तोत्रं समाप्तम् ।

Encoded and proofread by Nat Natarajan

*Shri Sharika Stotram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*